संस्कृत-वार्ता:

04.05.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- कृषिमन्त्री शिवराजसिंहचौहानः अद्य नवदिल्ल्यां भारतस्य द्वयोः जीनोम सम्पादितं तण्डुल प्रकारयोः आई.सी.ए.आर इत्यनेन विमोचनं कृतवान्।
- केन्द्रीयगृहमन्त्री अमितशाहेन सबलं प्रोक्तं यत् जनैः संस्कृतभाषाध्ययनं अभ्यासश्च करणीयः यतो हि भारतस्य सर्वमपि ज्ञानं संस्कृतभाषायामेव निहितं वर्तते।
- रक्षानुसन्धान-विकाससङ्गठनेन डीआरडीओ-इत्यनेन मध्यप्रदेशस्य श्योपुर-परीक्षण-स्थलात् समतापमण्डलीय-वायुयानपद्धत्याः प्रथमोड्डयन - परीक्षणं साफल्यपूर्वकं समाचरितम्।
- भारत-निर्वाचनायोगः शीघ्रमेव एकीकृत-प्राविधिक-मञ्चत्वेन ई-सी-आई-एन-ई-टी इत्येतस्य चलदूरभाषीय-तन्त्रांशस्य अनावरणं करिष्यति।
- प्रथमस्य विश्व-दृश्य-श्रव्य-मनोरञ्जन-शिखर-सम्मेलनस्य वेव्स् इत्यस्य अद्य मुंबईय्यां समापनं भविष्यति।
- **पञ्चविंशत्यधिक - द्विसहस्र - तमाब्दीया 'खेलो - इण्डिया'– युवक्रीडा बिहारस्य पटनायां पाटलिपुत्र-खेल-परिसरे भव्यसमारोह-पूर्वकम् अद्य समारब्धा।**

<u>आईसीएआर-तण्डुल इति</u>

कृषिमन्त्री शिवराजसिंहचौहानः अद्य नवदिल्ल्यां भारतस्य द्वयोः जीनोम सम्पादितयोः तण्डुल-प्रकारयोः आइसीएआर-इत्यनेन विमोचनं कृतवान्। आयोजनं सम्बोधयन् मन्त्री अवदत् यत् अद्य भारतस्य कृते ऐतिहासिकः दिवसः अस्ति। एतयोः प्रकारयोः उत्पादनव्ययः न्यूनी भविष्यति, देशे तण्डुलानां उत्पादनं च वर्धयिष्यते इति सः अवदत्।

<u>अंगोला-राष्ट्रपतिः</u>

अंगोलायाः राष्ट्रपतिः जोआओ मैनुअल गोंकाल्वेस लौरेंको इत्यमुना प्रोक्तं यत् भारत-अंगोलादेशौ द्विपक्षीय-सम्बन्धानां संवर्द्धनार्थं प्रतिबद्धौ स्तः । अद्य नवदिल्ल्यां भारत-अंगोला-व्यापार-मञ्चोपरि तेन प्रोक्तं यत् भारतस्य सामान्यौषधीषु विशेषज्ञता वर्तते। उपस्थित-जनसमूहं सम्बोधयन् केन्द्रीय-विदेश-राज्यमन्त्री कीर्ति-वर्धन-सिंहः प्रोक्तवान् यत् भारत-अंगोलादेशयोः द्विपक्षीय-सम्बन्धः जीवन्तोर्जा क्षेत्रे आधारितः वर्तते।

## शाह-संस्कृतायोजनम्

केन्द्रीयगृहमन्त्री अमितशाहेन अद्य प्रोक्तं यत् जनैः संस्कृतभाषाध्ययनं अभ्यासश्च करणीयः यतो हि भारतस्य सर्वमपि ज्ञानं संस्कृतभाषायामेव निहितं वर्तते। सः अवदत् यत् संस्कृतभाषा जगतः समाह्वानानां समाधानाय मार्गदर्शनं कर्तुं शक्नोति। गृहमन्त्री नवदिल्ल्यां संस्कृतभारत्या आयोजितानाम् अष्टोत्तरैकसहस्र-संस्कृतसम्भाषणशिबिराणां समापनकार्यक्रमं सम्बोधयन् एवम् उक्तवान्। संस्कृतभाषायाः महत्त्वं बोधयन् श्रीशाहः अवदत् यत् संस्कृतभाषा अधिकांशभाषाणां जननी अस्ति। सः अवदत् यत् देशे संस्कृतस्य प्रचारार्थं सर्वकारः कार्यं कुर्वन् अस्ति।

अस्माकं संवाददात्रानुसारी संस्कृतभारत्या अप्रैलमासस्य त्रयोविंशतिः दिनाङ्कादाराभ्य मईमासस्य तृतीय-दिनाङ्कपर्यन्तं राष्ट्रियराजधान्याम् अष्टोत्तरैकसहस्र-संस्कृतसम्भाषणशिबिराणां आयोजनं विहितम्। एतेषु शिबिरेषु पञ्चविंशतिसहस्रजनाः भागं गृहीत्वा संस्कृतभाषां अधितवन्तः। अस्मिन् कार्यक्रमे दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता, दिल्ली-भाजपाध्यक्षः वीरेन्द्र सचदेवा, दिल्ली-विश्वविद्यालयस्य कुलपतिः प्रो.योगेशसिंहः, संस्कृतभारत्याः गणमान्यजनाः च उपस्थिताः आसन् ।

## डीआरडीओ-वायुपोतपरीक्षणम्

रक्षानुसन्धान-विकाससङ्गठनेन (डीआरडीओ) इत्यनेन ह्यः मध्यप्रदेशस्य श्योपुर-परीक्षण-स्थलात् समतापमण्डलीय-वायुयानपद्धत्याः प्रथमोड्डयन-परीक्षणं साफल्यपूर्वकं समाचरितम्। उत्तरप्रदेशस्य आगरायां एरियल-डिलीवरी-अनुसन्धान-विकास-प्रतिष्ठानेन निर्मितः अयं वायुपोतः सप्तदश-किलोमीटरमितं यावदौन्नत्ये इंस्ट्रूमेंटल-पेलोड इत्यस्य साहाय्येन प्रक्षिप्तः। रक्षामन्त्री राजनाथसिंहेन सफलोड्डुयनार्थं डीआरडीओ-सङ्गठनाय शुभकामनाः प्रकल्पिताः। तेनोदीरितं यत् एषा प्रणाली भारतस्य भूम्यवलोकनस्य अन्वीक्षण-क्षमतायाश्च अद्वितीयरुपेण दृढीकरणं करिष्यति ।

## प्रधानमन्त्री-वायुसेनाप्रमुखः

प्रधानमन्त्री नरेन्द्रमोदी अद्य वायुसेनाप्रमुखेन एयर-चीफ-मार्शल- एपि-सिंहेन सह तस्य आवासे मिलितवान्। पहलगामे आतङ्क्याक्रमणात्परं भारतपाकिस्तानयोः सीम्नि अतिक्रमम् उद्दिश्य मेलनमिदं सुसम्पन्नम्।

## पञ्जाब-निगडनम्

पहलगाम-आतङ्क्याक्रमणानन्तरं एकस्मिन् घटनाक्रमे पाकिस्तानदेशाय गुप्तसूचनाप्रदानार्थं अमृतसरे पञ्जाबारक्षिदलेन द्वौ आरोपिणौ निगृहितौ । तत्र पलक-शेर-मसीहः अपरः सूरज-मसीहः इत्येतौ आरोपिणौ वर्तेते । एतयोः उपरि आरोपः वर्तते यत्तौ अमृतसरे स्थितानां विमानपत्तनानां सैन्यप्रतिष्ठानानाञ्च संवेदनशील-सूचनां गुप्ततया प्रसारितवन्तौ। वरिष्ठारक्षिसूत्रानुसारं प्रारम्भिकान्वेषणे तयोः सम्बन्धः पाकिस्तानदेशस्य गुप्तचरैस्सह सम्प्राप्तः । अधिकारिणां अभिमतं वर्तते यत् अन्वेषणस्य अनवरतत्वात् इतोऽपि गूढरहस्यानाम् उद्घाटनं भवितुमर्हति।

## निर्वाचनायोग-तन्त्रांशः

निर्वाचनायोगः शीघ्रमेव एकीकृत-प्राविधिक-मञ्चत्वेन ई-सी-आई-एन-ई-टी इत्येतस्य चलदूरभाषीय-तन्त्रांशस्य अनावरणं करिष्यति। अनेन निर्वाचनसम्बद्ध-गतिविधयः हितधारकाः एकस्मिन्नेव स्थाने प्राप्तुमर्हन्ति। आयोगेन एकस्मिन् वक्तव्ये कथितं यत् वन-स्टॉप प्लेटफ़ॉर्म, इसीआइ नेट इत्येतत् निर्वाचनायोगस्य चत्त्वारिंशदधिकानां चलदूरभाषीय-तन्त्रांशानां एकीकरणं पुनर्संरचनञ्च करिष्यति। एतत् उपयोगकर्तानुकूलं प्राविधिक-फलकम् मतदातृभिस्सह निर्वाचनाधिकारिभ्यः, राजनैतिक-दलेभ्यः, अन्येभ्यः हितधारकेभ्यश्च निर्मीयते। इसीआइ नेट इत्यस्मिन् उपयोगकर्तारः आकर्षकं सरलञ्चानुभवं प्राप्स्यन्ति। अस्योद्देश्यं वर्तते यत् उपयोगकर्तृणां विविधानुप्रयोगानां संग्रहणभारं दूरीभवेदिति।

## वेव्स

प्रथमस्य विश्व-दृश्य-श्रव्य-मनोरञ्जन-शिखर-सम्मेलनस्य वेव्स् इत्यस्य अद्य समापनम् भविष्यति। चतुर्दिवसीयस्य आयोजनस्य अन्तिमदिने चलच्चित्रनिर्माणस्य कार्याशाला, सांस्कृतिककार्यक्रमाश्च च मुख्याकर्षणं भविष्यन्ति । गुरुवासरे आरब्धस्यास्य आयोजनस्य उद्घाटनं प्रधानमन्त्रिणा नरेन्द्रमोदिना विहितम्।

## नीट्-परीक्षा

**राष्ट्रिय-परीक्षणाभिकरणेन अद्य अशेष-देशे पञ्च-सहस्राधिकेषु केन्द्रेषु विदेशेषु त्रयोदशसु नगरेषु च पञ्चविंशत्यधिक-द्वि-सहस्रतमाब्दीया नीट्-यूजीति राष्ट्रिय-पात्रता-प्रवेश-परीक्षा आयोज्यते।** परीक्षायाः कृते द्वाविंशति दशमलव सप्त लक्षाधिकाः अभ्यर्थिनः पञ्जीकरणं कृतवन्तः। **अभिकरणेन उक्तं यत् सुरक्षित-संरक्षित-परीक्षायोजनाय सर्वविधा: व्यवस्था: प्रकल्पिता:** सन्ति।

## शिवानन्द

पद्मश्री सम्मानेन सम्मानितस्य प्रसिद्धयोगसाधकस्य स्वामी-शिवानन्द बाबावर्यस्य ह्यः वाराणस्यां निधनमभवत्। सः अष्टाविंशोत्तरैकशतवर्षीयः आसीत्। प्रधानमन्त्री नरेन्द्रमोदी मुख्यमन्त्री योगी आदित्यनाथः च शिवानन्दबाबवर्यस्य देहावसाने शोकं प्रकटितवन्तौ। स्वसन्देशे श्रीमोदी अवदत् यत् योगाय आध्यात्मिकाभ्यासाय च समर्पितं तस्य जीवनं देशस्य प्रत्येकं जनं प्रेरयिष्यति।

## बद्रीनाथः

उत्तराखण्डस्य चमोलीमण्डले अद्य प्रातः बद्रीनाथधाम्नः पवित्रद्वारं पारम्परिकरीत्या समुद्घाटितम्। अनेन सहैव उत्तराखण्डस्य चत्वारि अपि तीर्थस्थलानि – केदारनाथ-गङ्गोत्री-यमुनोत्री-बद्रीनाथादय: तीर्थयात्रिणां कृते दर्शनार्थं उद्घटितानि सन्ति। अत्रावसरे सैन्यसमूहस्य वाद्ययन्त्रैः सामञ्जस्यपूर्णध्वनिना मन्दिरपरिसरः "जय बद्री विशाल" इति ध्वनिना प्रतिध्वनितम् आसीत् ।

अस्मिन् अवसरे बहुसंख्यायां श्रद्धालवः पूजार्चनां कृतवन्तः। उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी अपि बद्रीनाथधाम्नि प्रार्थनां कृतवान् । पश्चात् वार्ताहरैः सह प्रवदन् श्रीधामी अवदत् यत् भक्तानां सहजता, सुरक्षा, सुविधा च सुनिश्चित्य विस्तृतव्यवस्था: कृता: सन्ति।

<u>आईपीएल :</u>

आईपीएल इत्येतस्यां क्रिकेट्-स्पर्धा-मालिका-क्रीडायाम् अद्य कोलकाता-नाइट् राइडर्स्-राजस्थान-रॉयल्स्- दलयोः मध्ये कोलकाता-नगरस्य ईडेन्-गार्डेंस क्रीडाङ्गणे द्वन्द्वं सम्प्रति प्रचलति । अद्य अन्यस्मिन् द्वन्द्वे पञ्जाब-किङ्ग्स्-दलं लखनऊ-सुपर-जायन्ट्स्-दलं धर्मशालायां सायं सार्धसप्तवादने सम्मुखीकरिष्यति ।

<u>‘खेलो-इण्डिया’-क्रीडा:</u>

**पञ्चविंशत्यधिक - द्विसहस्र - तमाब्दीया ‘खेलो - इण्डिया’– युवक्रीडा -स्पर्धा - मालिका बिहारे पटनायां पाटलिपुत्र-खेल-परिसरे भव्यसमारोह-पूर्वकम् अद्य समारब्धा । मुख्यमन्त्री नीतीश-कुमार: केन्द्रीय: खेलमन्त्री डॉ.मनसुख-मांडविया च अस्य समारोहस्य उद्घाटनं** कृतवन्तौ। प्रधानमन्त्रिणा नरेन्द्रमोदिना चलच्चित्र-सन्देश-माध्यमेन प्रतिभागिनः सम्बोधिता:। **मई-मासस्य पञ्चदश-दिनाङ्कं यावत् एता: स्पर्धा: प्रचलिष्यन्ति।** आकाशवाणी क्रीडायाः उद्घाटनसमारोहस्य सजव कार्यक्रमं आनेष्यति। कार्यक्रमः सायं पञ्च-पञ्चाशन्निमेषाधिक पञ्च वादने आरभ्य सायं सार्द्धसप्तवादनपर्यन्तं वा समारोहस्य अन्त्यपर्यन्तं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति।

।। इति वार्ता ।।